प्रतिभागः पुराणां वा ग्रामाणां वा पुराभवत् ॥
न शस्यानि न गोरक्ष्यं न कृषिर्न वणिक्पथः ।
वैण्यात् प्रभृति मैत्रेय ! सर्व्वस्यैतस्य सम्भवः ॥
यत्र यत्र समं त्वस्या भूमेरासीद्द्विजोत्तम ! ।
तत्र तत्र प्रजानां हि निवासं समरोचयत् ॥
आहारः फलमूलानि प्रजानामभवत्तदा ।
कृच्छ्रेण महता सोऽपि प्रनष्टास्वोषधीषु वै ॥
स कल्पयित्वा वत्सन्तु मनुं स्वायम्भुवं प्रभुम् ।
स्वे पाणौ पृथिवीनाथो दुदोह पृथिवीं पृथुः ॥
शस्यजातानि सर्व्वाणि प्रजानां हितकाम्यया ।
तेनान्नेन प्रजास्तात ! वर्त्तन्तेऽद्यापि नित्यशः ॥
प्राणप्रदानात् स पृथुर्यस्माद्भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥
ततश्च देवैर्मुनिभिर्दैत्यै रक्षोभिरद्रिभिः ।
गन्धर्व्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा ॥
तत्तत्पात्रमुपादाय तत्र दुग्धा मुने ! पयः ।
वत्स ! दोग्धृविशेषाश्च तेषां तद्योनयोऽभवन् ॥
सैषा धात्री विधात्री च धारणी पोषणी तथा ।
सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥
एवंप्रभावः स पृथुः पुत्त्रो वेणस्य वीर्य्यवान् ।
जज्ञे महीपतिः पूर्व्वो राजाभूज्जनरञ्जनात् ॥”
इति श्रीविष्णुपुराणे १ अंशे पृथुचरितं १३ अध्यायः ॥ * ॥
तस्या नामगोरूपदोहनानां कारणानि यथा,—
ऋषय ऊचुः ।
“बहुभिर्धरणी भुक्ता भूपालैः श्रूयते पुरा ।
पार्थिवाः पृथिवीयोगात् पृथिवी कस्य योगतः ॥
किमर्थञ्च कृता संज्ञा भूमिः किं पारिभाषिकी ।
गौरितीयञ्च विख्याता सूत ! कस्माद्ब्रवीहि नः ॥
सूत उवाच ।
वंशे स्वायम्भुवे ह्यासीदङ्गो नाम प्रजापतिः ।
मृत्योस्तु दुहिता तेन परिणीतातिदुर्मुखी ॥
सुनीथा नाम तस्यास्तु वेणो नाम सुतः पुरा ।
अधर्म्मनिरतः कामी बलवान् वसुधाधिपः ॥
लोकेऽप्यधर्म्मकृज्जातः परभार्य्यापहारकः ।
धर्म्माचारप्रसिद्ध्यर्थं जगतोऽस्य महर्षिभिः ॥
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः ।
शापेन मारयित्वैनमराजकभयार्द्दिताः ।
ममन्थुर्ब्राह्मणास्तस्य बलाद्देहमकल्मषाः ॥
तत्कायान्मथ्यमानात्तु निष्पेतुर्म्लेच्छजातयः ॥
शरीरे मातुरंशेन कृष्णाञ्जनसमप्रभाः ।
पितुरङ्गस्य चांशेन धार्म्मिको धर्म्मचारिणः ॥
उत्पन्नो दक्षिणाद्धस्तात् सधनुः सशरो गदी ।
दिव्यतेजोमयवपुः सरत्नकवचाङ्गदः ॥
पृथुरेवाभवद्यस्मात्ततः पृथुरजायत ।
स विप्रैरभिषिक्तश्च तपः कृत्वा सुदुश्चरम् ॥
विष्णोर्व्वरेण सर्व्वस्य प्रभुत्वमगमत् प्रभुः ।
निःस्वाध्यायवषट्कारं निर्धनं वीक्ष्य भूतलम् ॥
दग्धुमेवोद्यतः कोपाच्छरेणामितविक्रमः ।
ततो गोरूपमास्थाय भूः पलायितुमुत्सहेत् ॥
पृष्ठतोऽनुगतस्तस्याः पृथुर्दीप्तशरासनः ।
ततः स्थित्वैकदेशे तु किं करोमीति साब्रवीत् ॥
पृथुरप्यवदद्वाक्यमीप्सितं देहि सुव्रते ! ।
सर्व्वस्य जगतः शीघ्रं स्थावरस्य चरस्य च ॥
तथैव चाब्रवीद्भूमिर्दुदोह च नराधिपः ।
स्वे स्वे पाणौ पृथुर्वत्सं कृत्वा स्वायम्भुवं मनुम् ॥
तदन्नमभवत् शुद्धं प्रजा जीवन्ति तेन वै ।
ततस्तु ऋषिभिर्दुग्धा वत्सः सोमस्तदाभवत् ॥
दोग्धा बृहस्पतिरभूत् पात्रं वेदस्तपो रसः ।
देवैश्च वसुधा दुग्धा दोग्धा मित्रस्तदाभवत् ॥
इन्द्रो वत्सः समभवत् क्षीरमूर्ज्जस्करं बलम् ।
देवानां काञ्चनं पात्रं पितॄणां राजतन्तदा ॥
अन्तकश्चाभवद्दोग्धा यमो वत्सः सुधारसः ।
अलाबुपात्रं नागानां तक्षको वत्सकोऽभवत् ॥
विषं क्षीरं ततो दोग्धा धृतराष्ट्रोऽभवत् पुनः ।
असुरैरपि दुग्धेयमायसे शक्रपीड़नीम् ॥
पात्रे मायामभूद्वत्सः प्रह्लादिश्च विरोचनः ।
दोग्धा द्विमूर्द्धा तत्रासीन्माया येन प्रवर्त्तिता ॥
यक्षैश्च वसुधा दुग्धा पुरान्तर्द्धानमीप्सुभिः ।
कृत्वा वैश्रवणं वत्समामपात्रे महीपते ! ॥
प्रेतरक्षोगणैर्दुग्धा धरा रुधिरमुल्बणम् ।
रौप्यनाभोऽभवद्दोग्धा सुमाली वत्स एव तु ॥
गन्धर्व्वैश्च पुनर्दुग्धा वसुधा चाप्सरोगणैः ।
वत्सं चैत्ररथं कृत्वा गन्धान् पद्मदले तथा ॥
दोग्धा च सुरुचिर्नाम नाट्यवेदस्य पारगः ।
गिरिभिर्वसुधा दुग्धा रत्नानि विविधानि च ॥
औषधानि च दिव्यानि दोग्धा मेरुर्महाबलः ।
वत्सोऽभूद्धिमवांस्तत्र पात्रं शैलमयं पुनः ॥
वृक्षैश्च वसुधा दुग्धा क्षीरं छिन्नप्ररोहणम् ।
पालाशपात्रे दोग्धा तु सालः पुष्पदलाकुलः ॥
प्लक्षोऽभवत्ततो वत्सः सर्व्ववृक्षगणाधिपः ।
एवमन्यैश्च वसुधा तथा दुग्धा यथेप्सितम् ॥”
इति मत्स्यपुराणे १० अध्यायः ॥ * ॥
अन्यद्विवरणं भूगोलशब्दे द्रष्टव्यम् ॥ पृथ्वी । तद्वैदिकपर्य्यायः । गौः १ ग्मा २ ज्मा ३ क्ष्मा ४ क्षा ५ क्षामा ६ क्षोणी ७ क्षितिः ८ अवनिः ९ उर्व्वी १० पृथ्वी ११ मही १२ रिपः १३ अदितिः १४ इला १५ निरृतिः १६ भूः १७ भूमिः १८ पूषा १९ गातुः २० गोत्रा २१ । इत्येकविंशतिपृथिवीनामधेयानि । इति वेदनिघण्टौ १ अध्यायः ॥ (अन्तरिक्षम् । इति निघण्टुः ।१।३ ॥ यथा, ऋग्वेदे ।१०।१२१।१ ।
“स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥”
“पृथिवीत्यन्तरिक्षनाम ।” इति तद्भाष्ये सायनः ॥)

पृथिवीगीता, स्त्री, (पृथिव्या गीता ।) पृथिवीकथा । यथा,—
“मैत्रेय ! पृथिवीगीताः श्लोकांश्चात्र निबोध तान् ।
यानाह धर्म्मध्वजिने जनकायासितो मुनिः ॥
श्रीपृथिव्युवाच ।
कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि ।
येन केन सधर्म्माणोऽप्यतिविश्वस्तचेतसः ॥
पूर्व्वमात्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः ।
ततो भृत्यांश्च पौरांश्च जिगीषन्ते तथा रिपून् ॥
क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम् ।
इत्यासक्तधियो मृत्युं न पश्यन्त्यविदूरगम् ॥
समुद्रावरणं याति मन्मण्डलमथो वशम् ।
कियदात्मजयादेतन्मुक्तिरात्मजये फलम् ॥
उत्सृज्य पूर्व्वे यां याता यां नादाय गतः पिता ।
तां मामतिविमूढ़त्वाज्जेतुमिच्छन्ति पार्थिवाः ॥
मत्कृते पितृपुत्त्राणां भ्रातॄणाञ्चापि विग्रहाः ।
जायन्तेऽत्यन्तमोहेन ममत्वादृतचेतसाम् ॥
पृथ्वी ममेयं सकला ममेयं
ममेति चैषा मम शाश्वतेयम् ।
यो यो मृतेऽन्यत्र बभूव राजा
कुबुद्धिरासीदिति तस्य तस्य ॥
दृष्ट्वा ममत्वादृतचित्तमेकं
विहाय मां मृत्युपथं व्रजन्तम् ।
तस्यान्वयस्तत्र कथं ममत्वं
हृद्यास्पदं मत्प्रभवं करोति ॥
पृथ्वी ममैषाशु परित्यजैनां
वदन्ति ये दूतमुखैः स्वशत्रून् ।
नराधिपास्तेषु ममातिहासः
पुनश्च मूढ़ेषु दयाभ्युपैति ॥
श्रीपराशर उवाच ।
इत्येते धरणीगीताः श्लोका मैत्रेय यैः श्रुताः ।
ममत्वं विलयं याति तापन्यस्तं यथा हिमम् ॥”
इति विष्णुपुराणे ४ अंशे २४ अध्यायः ॥

पृथिवीपतिः, पुं, (पृथिव्याः पतिः ।) राजा । (यथा, मनुः । ७ । १७७ ।
“सर्व्वोपायैस्तथा कुर्य्यात् नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥”)
ऋषभनामौषधिः । इति मेदिनी । ते, २३१ ॥ यमः । इति हेमचन्द्रः ॥

पृथिवीपालः, पुं, (पृथिवीं पालयतीति । पृथिवी + पालि + अण् ।) राजा । यथा,—
“बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥”
इति रघुः ॥

पृथिवीशक्रः, पुं, (पृथिव्यां शक्र इव ।) राजा । इति हेमचन्द्रः । ३ । ३५३ ॥

पृथुः, पुं, (प्रथते विख्यातो भवतीति । प्रथ + “प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ।” उणा० १ । २९ । इति कुः सम्प्रसारणञ्च ।) त्रेतायुगे सूर्य्यवंशीयषष्ठनृपः । वेणनृपस्य दक्षिणकरमथनाज्जातः । प्रजारञ्जनात् आद्यराजोपाधिं प्राप्तः । यथा,—
“अथ ते ऋषयः सर्व्वे प्रसन्नमनसस्ततः ।
गतकल्मषमेवं तं जातं वेणं नृपोत्तमम् ॥
ममन्थुर्दक्षिणं पाणिं तस्यैव च महात्मनः ।
मथिते तस्य पाणौ च सञ्जातं स्वेदमेव हि ॥
पुनर्ममन्थुस्ते विप्रा दक्षिणं पाणिमेव च ।
स्वकरात् पुरुषो जज्ञे द्वादशादित्यसन्निभः ॥
तप्तकाञ्चनवर्णाङ्गो दिव्यमाल्याम्बरावृतः ।
दिव्याभरणशोभाङ्गो दिव्यगन्धानुलेपनः ॥